# 18

## मोक्षसंन्यासयोगः

अर्जुन उवाच

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्।

त्यागस्य च हृषीकेश पृथक्केशिनिषूदन॥ १॥

tyāga *m* - оставление, покидание, изгнание, удаление, отказ, самопожертвование, раздача даров;
keśiniṣūdana (keśi-niṣūdana) - убийца демона Кешина;

श्रीभगवानुवाच

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।

nyāsa *m* - оставление, отказ;

सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥ २॥

vicakṣaṇa - благоразумный, рассудительный, умный, мудрый;

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।

manīṣin - разумный, мудрый;

यज्ञदानतपःकर्म न त्याज्यमिति चापरे॥ ३॥

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम।

त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः॥ ४॥

saṃprakīrtita (p.p. *om* den. sam-pra-√kīrtay) - упомянутый, указанный, названный;

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।

यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥ ५॥

pāvana - очищающий; *n* средство очищения;

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।

कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥ ६॥

नियतस्य तु संन्यासः कर्मणो नोपपद्यते।

upa-√pad IV Ā. - достигать, доставаться, сбываться, оказываться верным, подходить;

मोहात्तस्य परित्यागस्तामसः परिकीर्तितः॥ ७॥

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्।

kleśa *m* - трудность, неудобство; мучение, страдание;

स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥ ८॥

कार्यमित्येव यत्कर्म नियतं क्रियते ऽर्जुन।

सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः॥ ९॥

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते।

त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः॥ १०॥

medhāvin - мудрый, умный, разумный;

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।

यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११ ॥

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।

miśra - смешанный;

भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥ १२ ॥

पञ्चैतानि महाबाहो कारणानि निबोध मे ।

सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥ १३ ॥

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।

karaṇa *n* - дело, занятие; орган чувств; инструмент, орудие...;
pṛthagvidha (pṛthag-vidha) - различный, многообразный, отличающийся от ч.-л. .(+*In.*);

विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥ १४ ॥

ceṣṭā *f* - деятельность, поведение;

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।

न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥ १५ ॥

nyāyya - правильный;
viparīta (p.p. *от* vi-pari-√i) - превратный, противоположный, плохой;

तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।

पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १६ ॥

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।

हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ॥ १७ ॥

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।

करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८ ॥

saṅgraha *m* - получение, добывание, собирание, запас; выдержка, краткое изложение, сохранение;

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।

प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९ ॥

saṅkhyāna *n* - расчет, вычисление, перечисление;

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।

अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ २० ॥

vi-√bhaj (I U., p.p. vibhakta) - разделять, распределять, почитать;

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ।

वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१ ॥

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ।

ahaitukam *adv.*- беспричинно;

अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥ २२ ॥

नियतं सङ्गरहितमरागद्वेषतः कृतम्।

अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते॥ २३॥

यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः।

क्रियते बहुलायासं तद्राजसमुदाहृतम्॥ २४॥

āyāsa *m* - усилие, утомление, труд, хлопоты;

अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।

anubandha *m* - совпадение, составляющая часть; последствие; затруднение, препятствие;

मोहादारभ्यते कर्म यत्तत्तामसमुच्यते॥ २५॥

मुक्तसङ्गो ऽनहंवादी धृत्युत्साहसमन्वितः।

सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते॥ २६॥

nirvikāra - неизменный, прочный, устойчивый;

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मको ऽशुचिः।

हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः॥ २७॥

अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिको ऽलसः।

prākṛta - естественный, обыкновенный, вульгарный; *m* грубый, вульгарный человек; *n* пракрит;
stabdha (p.p. *om* √stambh) - оцепеневший, остолбеневший; упрямый; гордый, заносчивый;
śaṭha - фальшивый, коварный, злобный;
naikṛtika - нечестный, подлый;
alasa - бледный; ленивый, инертный;

विषादी दीर्घसूत्री च कर्ता तामस उच्यते॥ २८॥

dīrghasūtrin (dīrgha-sūtrin) - "тянущий длинную нить", медлительный, нерасторопный;

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु।

प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय॥ २९॥

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।

बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी॥ ३०॥

यया धर्ममधर्मं च कार्यं चाकार्यमेव च।

अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी॥ ३१॥

yathāvat *adv.* - надлежащим образом;

अधर्मं धर्ममिति या मन्यते तमसावृता।

सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी॥ ३२॥

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।

योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी॥ ३३॥

avyabhicārin - невраждебный, благосклонный; верный; непогрешимый, безошибочный;

यया तु धर्मकामार्थान्धृत्या धारयते ऽर्जुन।

प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी॥ ३४॥

यया स्वप्नं भयं शोकं विषादं मदमेव च ।

न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥ ३५ ॥

durmedhas - слабоумный, глупый, тупой;

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।

अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥ ३६ ॥

ni-√gam I P. - спускаться, входить, становиться,

यत्तदग्रे विषमिव परिणामे ऽमृतोपमम् ।

pariṇāme *adv.* - в конце;

तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७ ॥

prasāda *m* - милость, благосклонность, спокойствие; ясность, чистота;

विषयेन्द्रियसंयोगाद्यत्तदग्रे ऽमृतोपमम् ।

परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८ ॥

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।

anubandha *m* - связь, совпадение; результат, следствие; повторение, затруднение, препятствие; составная часть;

निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥ ३९ ॥

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।

सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥ ४० ॥

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ।

कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१ ॥

pra-vi-√bhaj I U. - разделять, распределять;

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।

kṣānti *f* - терпение, снисходительность;

ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ ४२ ॥

āstikya *n* - набожность, благочестие;

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।

śaurya *n* - мужество, героизм;
tejas *n* - острота, огонь, жар, зной; сила, мощь; блеск, красота, величие, достоинство;
dākṣya *n* - усердие, ловкость, мастерство;

दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ ४३ ॥

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ।

gorakṣya *n* - скотоводство;

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ ४४ ॥

paricarya *n* - прислуживание, уход;

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।

abhi-√ram I Ā. - наслаждаться, радоваться;

स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥ ४५ ॥

ni-√ram I Ā. - радоваться, получать удовольствие, отдыхать; успокаиваться;

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।

स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥ ४६॥

abhy-√arc (abhi-√arc) I P. - почитать, восхвалять;

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।

स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्॥ ४७॥

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।

sahaja - природный, естественный, врожденный;

सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः॥ ४८॥

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः।

नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति॥ ४९॥

naiṣkarmya *n* - недеяние, бездеятельность;

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे।

समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा॥ ५०॥

niṣṭhā *f* - позиция, точка зрения; обязательство; знание, завершение, вершина;

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च।

शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥ ५१॥

vy-ud-√as (vi-ut-√as) IV P. - отказываться, устранять;

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः।

vivikta (p.p. *от* vi-√vic) - отдельный, уединенный; *n* одиночество, уединение;
laghvāśin (laghv-āśin) - "легко едящий", умеренный в еде;

ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥ ५२॥

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम्।

विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते॥ ५३॥

bhūya *n* - бытие;

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।

समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥ ५४॥

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः।

ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥ ५५॥

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।

vyapāśraya *m* - прибежище, пристанище, поддержка;

मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्॥ ५६॥

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः।

बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव॥ ५७॥

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ।

अथ चेत्त्वमहंकारान्न श्रोष्यसि विनङ्क्ष्यसि ॥ ५८ ॥

यदहंकारमाश्रित्य न योत्स्य इति मन्यसे ।

मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९ ॥

mithyā *adv.* - ложно, обманным образом, неверно, напрасно
vyavasāya *m* - решение, твердость, твердое намерение;
ni-√yuj VII U. - принуждать, назначать, поручать;

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा ।

कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशो ऽपि तत् ॥ ६० ॥

ईश्वरः सर्वभूतानां हृद्देशे ऽर्जुन तिष्ठति ।

भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ ६१ ॥

तमेव शरणं गच्छ सर्वभावेन भारत ।

तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६२ ॥

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ।

विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६३ ॥

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।

इष्टो ऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ ६४ ॥

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।

मामेवैष्यसि सत्यं ते प्रतिजाने प्रियो ऽसि मे ॥ ६५ ॥

prati-√jñā IX U. - признавать, соглашаться, обещать, высказывать;

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥

इदं ते नातपस्काय नाभक्ताय कदाचन ।

atapasa, atapaska, atapasya - отрицающий аскезу, неверующий;

न चाशुश्रूषवे वाच्यं न च मां यो ऽभ्यसूयति ॥ ६७ ॥

य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।

भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।

भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥ ६९ ॥

अध्येष्यते च य इमं धर्म्यं संवादमावयोः ।

ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥ ७० ॥

श्रद्धावाननसूयश्च शृणुयादपि यो नरः ।

सो ऽपि मुक्तः शुभांल्लोकान्प्राप्नुयात्पुण्यकर्मणाम्॥ ७१ ॥

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा।

ekāgra (eka-agra) - целеустремленный, внимательный, погруженный во ч.-л.;

कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ॥ ७२ ॥

अर्जुन उवाच

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत।

स्थितो ऽस्मि गतसंदेहः करिष्ये वचनं तव ॥ ७३ ॥

संजय उवाच

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः।

संवादमिममश्रौषमद्भुतं रोमहर्षणम्॥ ७४ ॥

romaharṣaṇa (roma-harṣaṇa) - вызывающий волнение, поднимающий волоски на теле;

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम्।

योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम्॥ ७५ ॥

राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम्।

केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥

√harṣ (IV P. hṛṣyati, p.p. hṛṣṭa) - радоваться, увлекаться;

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः।

विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः ॥ ७७ ॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।

dhanurdhara (dhanur-dhara) - держащий лук; *m* лучник;

तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥

bhūti *f* - благо, благоденствие; успех, счастье.